| | | |
|---|---|---|
| | अथ पञ्चदशोऽध्यायः<br>पुरुषोत्तमयोगः | atha pañcadaśo'dhyāyaḥ<br>puruṣottama-yogaḥ |
| 1 | श्रीभगवानुवाच<br>ऊर्ध्वमूलमधःशाखम्<br>अश्वत्थं प्राहुरव्ययम् ।<br>छन्दांसि यस्य पर्णानि<br>यस्तं वेद स वेदवित् ॥१॥ | śrī bhagavān uvāca<br>ūrdhvamūlam adhaḥ-śākham<br>aśvattham prāhur avyayam<br>chandāmsi yasya parṇāni<br>yas tam veda sa vedavit |
| 2 | अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः<br>गुणप्रवृद्धा विषयप्रवालाः।<br>अधश्च मूलान्यनुसंततानि<br>कर्मानुबन्धीनि मनुष्यलोके ॥२॥ | adhaś-cordhvam prasrtās-tasya śākhāḥ<br>guṇa-pravrddhā viṣaya-pravālāḥ<br>adhaśca mūlān-yanu-sañta-tāni<br>karmānu-bandhīni manuṣya-loke |
| 3 | न रूपमस्येह तथोपलभ्यते<br>नान्तो न चादिर्न च संप्रतिष्ठा ।<br>अश्वत्थमेनं सुविरूढमूलम्<br>असङ्गशस्त्रेण दृढेन छित्त्वा ॥३॥ | na rūpam asyeha tathopa-labhyate<br>nānto na cādir-na ca sam-pratiṣṭhā<br>aśvattham-enam suvirūḍha-mūlam<br>asaṅga-śastreṇa drḍhena chittvā |
| 4 | ततः पदं तत्परिमार्गितव्यं<br>यस्मिन्गता न निवर्तन्ति भूयः ।<br>तमेव चाद्यं पुरुषं प्रपद्ये<br>यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥ | tataḥ padam tat-pari-mārgi-tavyam<br>yasmin-gatā na nivartanti bhūyaḥ<br>tam eva cā'dyam puruṣam prapadye<br>ya-taḥ pravrtti prasrtā purāṇī |
| 5 | निर्मानमोहा जितसङ्गदोषाः<br>अध्यात्मनित्या विनिवृत्तकामाः ।<br>द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैः<br>गच्छन्त्यमूढाः पदमव्ययं तत् ॥५॥ | nirmāna-mohā jita-saṅga-doṣāḥ<br>adhyātma-nityā vini-vrtta-kāmāḥ<br>dvandvair-vimuktāḥ sukha-duḥkha-saṅjñaiḥ<br>gacchantya-mūḍhāḥ padam avyayam tat |
| 6 | न तद्भासयते सूर्यः<br>न शशाङ्को न पावकः ।<br>यद्गत्वा न निवर्तन्ते<br>तद्धाम परमं मम ॥६॥ | na tad bhāsayate sūryaḥ<br>na śaśāṅko na pāvakaḥ<br>yad-gatvā na nivartante<br>tad-dhāma paramam mama |
| 7 | ममैवांशो जीवलोके<br>जीवभूतः सनातनः ।<br>मनः षष्ठानीन्द्रियाणि<br>प्रकृतिस्थानि कर्षति ॥७॥ | mamai-vāmśo jīva-loke<br>jīvabhūtaḥ sanātanaḥ<br>manaḥ ṣaṣṭhā-nīndri-yāṇi<br>prakrtis-thāni karṣati |

Note: The hyphens (-) that are present in the English transliteration are meant only to help break down syllables for reading, no break or pause is intended in the chanting

| | | |
|---|---|---|
| 8 | शरीरं यदवाप्नोति<br>यच्चाप्युत्क्रामतीश्वरः ।<br>गृहीत्वैतानि संयाति<br>वायुर्गन्धानिवाशयात् ॥८॥ | śarīram yad avāpnoti<br>yaccāp-yut-krāma-tīśvaraḥ<br>grhītvai-tāni saḿyāti<br>vāyur-gandhān-ivāśayāt |
| 9 | श्रोत्रं चक्षुः स्पर्शनं च<br>रसनं घ्राणमेव च ।<br>अधिष्ठाय मनश्चायं<br>विषयानुपसेवते ॥९॥ | śrotram cakṣuḥ sparśanam ca<br>rasanam ghrāṇameva ca<br>adhiṣṭhāya manaścāyam<br>viṣayān-upa-sevate |
| 10 | उत्क्रामन्तं स्थितं वापि<br>भुञ्जानं वा गुणान्वितम् ।<br>विमूढा नानुपश्यन्ति<br>पश्यन्ति ज्ञानचक्षुषः ॥१०॥ | utkrā-mantam sthitam vāpi<br>bhuñjānam vā guṇān-vitam<br>vimūḍhā nānu-paśyanti<br>paśyanti jñāna cakṣuṣaḥ |
| 11 | यतन्तो योगिनश्चैनं<br>पश्यन्त्यात्मन्यवस्थितम् ।<br>यतन्तोऽप्यकृतात्मानः<br>नैनं पश्यन्त्यचेतसः ॥११॥ | yatanto yoginaś-cainam<br>paśyant-yātmanya-vasthitam<br>yatantopya-krtātmānaḥ<br>nainam paśyant-ya-cetasaḥ |
| 12 | यदादित्यगतं तेजः<br>जगद् भासयतेऽखिलम् ।<br>यच्चन्द्रमसि यच्चाग्नौ<br>तत्तेजो विद्धि मामकम् ॥१२॥ | yad-ādityagatam tejaḥ<br>jagad bhāsayate-khilam<br>yac candramasi yaccāgnau<br>tat tejo viddhi māmakam |
| 13 | गामाविश्य च भूतानि<br>धारयाम्यहम् ओजसा ।<br>पुष्णामि चौषधीः सर्वाः<br>सोमो भूत्वा रसात्मकः ॥१३॥ | gām āviśya ca bhūtāni<br>dhārayām-yaham ojasā<br>puṣṇāmi causadhīḥ sarvāḥ<br>somo bhūtvā rasāt-makaḥ |
| 14 | अहं वैश्वानरो भूत्वा<br>प्राणिनां देहमाश्रितः ।<br>प्राणापानसमायुक्तः<br>पचाम्यन्नं चतुर्विधम् ॥१४॥ | aham vaiśvānaro bhūtvā<br>prāṇinām deham āśritaḥ<br>prāṇā-pāna-samā-yuktaḥ<br>pacām-yannam catur-vidham |

Note: The hyphens (-) that are present in the English transliteration are meant only to help break down syllables for reading, no break or pause is intended in the chanting

| | | |
|---|---|---|
| 15 | सर्वस्य चाहं हृदि संनिविष्टः<br>मत्तः स्मृतिर्ज्ञानमपोहनं च ।<br>वेदैश्च सर्वैरहमेव वेद्यः<br>वेदान्तकृद्वेदविदेव चाहम् ॥१५॥ | sarvasya cāham hrdi sañni-viṣṭaḥ<br>mattaḥ smrtir-jñānam-apohanam ca<br>vedaiśca sarvair-aham-eva vedyaḥ<br>vedānta-krd-veda-vid-eva cāham |
| 16 | द्वाविमौ पुरुषौ लोके<br>क्षरश्चाक्षर एव च ।<br>क्षरः सर्वाणि भूतानि<br>कूटस्थोऽक्षर उच्यते ॥१६॥ | dvāvimau puruṣau loke<br>kṣaraś-cākṣara eva ca<br>kṣaraḥ sarvāṇi bhūtāni<br>kūtas-thokṣara ucyate |
| 17 | उत्तमः पुरुषस्त्वन्यः<br>परमात्मेत्युदाहृतः ।<br>यो लोकत्रयमाविश्य<br>बिभर्त्यव्यय ईश्वरः ॥१७॥ | uttamaḥ puruṣas-tvanyaḥ<br>paramātmet-yudā-hrtaḥ<br>yo loka-trayam-āviśya<br>bibhart-yavyaya īśvaraḥ |
| 18 | यस्मात्क्षरमतीतोऽहम्<br>अक्षरादपि चोत्तमः ।<br>अतोऽस्मि लोके वेदे च<br>प्रथितः पुरुषोत्तमः ॥१८॥ | yasmāt-kṣaram-atītoham<br>akṣarād-api cottamaḥ<br>ato'smi loke vede ca<br>prathitaḥ puruṣottamaḥ |
| 19 | यो मामेवमसंमूढः<br>जानाति पुरुषोत्तमम् ।<br>स सर्वविद् भजति मां<br>सर्वभावेन भारत ॥१९॥ | yo mām evam-asammūḍhaḥ<br>jānāti puruṣottamam<br>sa sarvavid-bhajati mām<br>sarva-bhāvena bhārata |
| 20 | इति गुह्यतमं शास्त्रम्<br>इदमुक्तं मयाऽनघ ।<br>एतद् बुद्ध्वा बुद्धिमान्स्यात्<br>कृतकृत्यश्च भारत ॥२०॥ | iti guhyata-mam śāstram<br>idam uktam mayānagha<br>etad buddhvā buddhimān-syāt<br>krtakrt-yaśca bhārata |
| | ॐ तत्सत्<br>इति श्रीमद्भगवद्गीतासूपनिषत्सु<br>ब्रह्मविद्यायां योगशास्त्रे<br>श्रीकृष्णार्जुनसंवादे<br>पुरुषोत्तमयोगो नाम<br>पञ्चदशोऽध्यायः ॥ | OM tatsat<br>iti śrīmadbhagavadgītāsu<br>upaniṣatsu<br>brahmavidyāyām yogaśāstre<br>śrīkrṣṇārjuna samvāde<br>puruṣottama-yogo nāma<br>pañcadaśo'dhyāyaḥ |

Note: The hyphens (-) that are present in the English transliteration are meant only to help break down syllables for reading, no break or pause is intended in the chanting